# श्रीललिता पञ्चरत्नम्

प्रातः स्मरामि ललिता वदनारविन्दं
बिम्बाधरं पृथुल मौक्तिक शोभिनासम् ।
आकर्ण दीर्घ नयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वल भालदेशम् ॥ १॥

प्रातर्भजामि ललिता भुज कल्पवल्लीं
रत्नाङ्गुळीय लसदङ्गुलि पल्लवाढ्याम् ।
माणिक्य हेम वलयाङ्गद शोभमानां
पुण्ड्रेक्षुचाप कुसुमेषु सृणीः दधानाम् ॥ २॥

प्रातर्नमामि ललिता चरणारविन्दं
भक्तेष्टदान निरतं भवसिन्धु पोतम् ।
पद्मासनादि सुर नायक पूजनीयं
पद्माङ्कुश ध्वज सुदर्शन लाञ्छनाढ्यम् ॥ ३॥

प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यन्तवेद्य विभवां करुणा नवद्याम् ।
विश्वस्य सृष्टि विलय स्थिति हेतुभूतां
विश्वेश्वरीं निगम वाङ्-मनसाति दूराम् ॥ ४॥

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।

श्रीशाम्भवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ ५॥

यः श्लोक पञ्चक मिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमल सौख्य मनन्त कीर्तिम् ॥ ६॥

॥ इति श्रीमच्छङ्कर भगवतः कृतौ ललिता पञ्चरत्नम् सम्पूर्णम् ॥